Postal Regd.No. GAMC- 1553/2019-2021
ISSN 2454-6313

संस्कृत-
# साम्प्रतम्
(Sampratam means "Current")

(संस्कृतमासिकीपत्रिका)
वर्ष : १५ अङ्क : १७६
जान्युआरी - २०२१

EKLAVYA SANSKRIT ACADEMY

Registered under RNI No. GUJMUL/2006/17235. Published on 5th of every month. Permitted to post at Ahmedabad PSO on 7th of every month under Postal Regd.No. GAMC- 1553/2019-2021 issued by SSP Ahmedabad. Valid upto 31-12-2021. containing 8 pages ₹ 10

## चिन्तनम्

सतीशः गज्जर्

### अहङ्कारः

वज्रान्नचूर्णस्य चिरमर्दनेन भाविरोटकस्य स्वादः वर्धते । मर्दनकाले विवेकेन कृतं जलसेचनम् अपि रोटककारस्य यशः वर्धयति । द्वाभ्यां हस्ताभ्यां प्रेम्णा लालितः कश्चित् अल्पपरिचितः पिण्डः दृष्टिक्षमं वर्तुलम् आकारं प्राप्य, अग्निं शरणं गच्छति । घृतलिप्तः सः अन्ते भोक्तुः स्थालिकायां निपतति । तदानीं रोटकं कः पक्ववान् इति पृष्टे सति, चुल्ल्याः समीपे मौनेन उपविष्टः कश्चित् स्त्रीजनः सगौरवं प्रतिवदति – 'अहम् !' एतादृशी अज्ञानप्रधाना अहङ्कारयात्रा चिरकालात् अग्निसाक्षिकं प्रचलति । रोटकस्य निर्माणात् पूर्वं कति हस्ताः साहाय्यं कृतवन्तः स्युः इति, निर्माणप्रक्रियायाः अन्ते उपविष्टः मनुष्यः न चिन्तयति ।

'अहङ्कार' शब्दस्य तात्त्विकः अर्थः अस्ति आध्यात्मिकम् अज्ञानम् । एतदेव अज्ञानं यदा व्यवहारपथे प्रवर्तते तदा मनुष्यः नृपनापितपुत्रन्यायेन स्वीयां कुरूपतां द्रष्टुं न पारयति । सर्वतः जीर्णं गृहम् अपि 'मम अस्ति' इति आश्वासनमात्रम् अहङ्कारं पोषयति । सर्वदोषसम्पन्नस्य अपि यानस्य, विक्रयकाले महती प्रशंसा क्रियते । स्वामी स्वयं यानस्य दीर्घं स्तवनं करोति । सः ग्राहकं वदति– भवतु नाम एतत् मम यानं पुरातनं वर्तते, तथापि एतस्य दृढं लौहं, वैदेशिकं बहुगुणं यन्त्रं भवन्तं चिरं नन्दयिष्यति । न तावत्, सः पुनः योजयति यत् एतस्य यानस्य अन्यः कोऽपि स्पर्शमपि न कृतवान् । वस्तुतः यानं 'सती' इव निष्कलङ्कम् अस्ति चेत् अन्तिमे वयसि भवान् तत् किमर्थं त्यजति ?

स्वं प्रति अधिका प्रीतिः अहङ्कारं जनयति । स्वकीयः पुत्रः प्रायः निर्दोषः भवति । कविः प्रशंसापानं सुखेन करोति, परन्तु स्वीयां मर्यादां श्रोतुं न शक्नोति कर्कशकण्ठाः मनुष्याः अपि नानागीतैः स्नानागारं पूरयन्ति । 'कण्ठः मम अस्ति' इत्येव तस्य वैशिष्ट्यम् ।

वहन्ती नदी प्रतिग्रामम् अमृतं वितरति । अन्ते सा सागरेण मिलति । अस्मिन् कथने वैचारिकं सौन्दर्यं न दृश्यते । वस्तुतः नदी सागरे विलीयते । विलीनायाः नद्याः भिन्नं किमपि अस्तित्वं नास्ति । एतादृशं निःशेषं समर्पणम् अहङ्कारस्य त्यागेन विना भवितुं नार्हति ।

अहङ्कारं न त्यजामः चेत् किं भवति ? सुभाषितकारः उत्तरं ददाति –

**अर्था हसन्ति उचितदानविहीनसत्त्वं भूम्यो हसन्ति मम भूमिरिति ब्रुवाणम् ।**
**जारा हसन्ति तनयान् उपलालयन्तं मृत्युर्हसति अवनिपं रणरङ्गभीरुम् ॥**

# ईश्वरवचसि न हि शङ्का

व्योम शाहः



पुरा दक्षिणभारते कश्चिद् समृद्धः ग्रामः आसीत्। ईश्वरकृपया तत्र सर्वेऽपि जनाः सन्तुष्टाः आसन्। अखिलः लोकः प्रभुभक्तिरतः आसीत्। तस्मिन् ग्रामे कौचन कृष्णभक्तौ उटजे निवसतः स्म। तौ स्वभावेन सरलौ अर्थेण च विरलौ आस्ताम्। अर्जुनाचार्यः तस्य च भार्या सुखेन जीवनम् अयापयताम्। प्रतिदिनं प्रातः उत्थाय सन्ध्यावन्दनादिकं कृत्वा अर्जुनाचार्यः भिक्षां याचितुम् गच्छति स्म। तस्य नियमः आसीत् यत् "भिक्षां याचितुं मया त्रिषु एव गृहेषु गन्तव्यम्। न एकमपि अधिकम्।" भिक्षाम् आनीय पतिपत्न्यौ सुखेन भोजनं कुर्वन्तौ आस्ताम्। एवंविध तेषां दिनचर्या।

तदानीम् अर्जुनाचार्यः श्रीमद्भगवद्गीताम् अधिकृत्य तस्याः टीकां लिखति स्म। प्रतिदिनं सः बहुपठनं लेखनं च करोति स्म। कदाचित् लेखने रतः सः भिक्षार्थं गमनम् एव व्यस्मरत्। तेन मध्याह्ने भिक्षार्थं विलम्बः जातः। अतः ग्रामे सर्वाः अपि महिलाः भोजनं कृत्वा शयनं अकुर्वन्। भिक्षां विना एव सः गृहं प्रत्यागच्छत्। पुनः सः श्रीमद्भगवद्गीतां पठितुम् उपविष्टवान्। तदा सः नवमम् अध्यायं पठति स्म। सः द्वाविंशतितमं श्लोकं पठितवान् यथा–

**अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते।**
**तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम्॥ इति**

सरलार्थः – ये जनाः माम् अन्योन्यं विचिन्त्य उपासन्ते, तेषां योग–क्षेमम् अहं वहामि।

एतत् पठित्वा अर्जुनाचार्यस्य मनसि शङ्का जाता। सः चिन्तितवान् – "ईश्वरः कथं सर्वेषामपि योगक्षेमं वहेत्? अत्र लेखने त्रुटिः भासते।" एवं विचार्य सः तस्मिन् पत्रे चिह्नमेकं कृतवान्। ततः "अहं स्नानार्थं नदीं गच्छामि।" एवं स्वभार्यां सूचयित्वा सः निर्गतः। मार्गेऽपि सः तथैव अचिन्तयत् यत् कथं 'सर्वेशः सर्वेषां योग–क्षेमं वहेत्' इति।

तदानीं तस्य गृहे द्वौ बालौ आगतवन्तौ। तौ तस्य भार्यायै ओदनं शाकानि फलानि दधि च अर्पितवन्तौ। बालौ तेजस्विनौ आस्ताम्। अतः अर्जुनाचार्यस्य भार्या तौ पृष्टवती – "कौ युवाम्? कुतः आगतौ?" एकः उक्तवान् – "आवाम् अर्जुनाचार्यस्य शिष्यौ स्वः। तेषाम् आज्ञाम् अनुसृत्य एतत् भवत्यै दत्तवन्तौ।" इत्युक्त्वा तौ

गन्तुं प्रयतताम्।

"अद्य अहं मम स्वामिने किञ्चिद् पक्तुं शक्ष्यामि।" इति चिन्तितवती सा। तदैव सा बालयोः पृष्ठे चिह्नानि दृष्टवती। सा तौ आहूय पृष्टवती – "रे बालौ ! कुतः युवयोः पृष्ठे एतानि चिह्नानि सन्ति ? कः एवं कृतवान् ?" एतत् श्रुत्वा बालः उक्तवान् – "भवत्याः पतिः अर्जुनाचार्यः अस्मभ्यं बहु परिश्रमं कारयति। यदि न कुर्वः तर्हि सः अस्मान् ताडयति।" सा विश्वासं न कृतवती। अनन्तरं सा गृहस्यान्तः गत्वा चन्दनम् अनीय तयोः पृष्ठे अलेपयत्। तस्मात् तयोः पीडा शीघ्रं निर्गता। तौ "धन्यवादाः" इत्युक्त्वा निर्गतौ।

अर्जुनाचार्यः गृहम् आगतः। तस्य भार्या अर्जुनाचार्ये रुष्टा आसीत्। सा तेन सह वार्तालापं न कृतवती। सः पृष्टवान् – "अयि ! किं कृतं मया यद् भवती रुष्टा मयि ?" "भवान् सज्जनः नास्ति। भवान् लघून् बालकान् ताडयति" इति सा उदितवती। "कथम् ?" इति पृष्टे सा सम्पूर्णं वृत्तान्तम् उक्तवती। सर्वं श्रुत्वा अर्जुनाचार्येण ज्ञातं यद् एतौ बालौ कृष्ण–बलरामौ एव स्याताम्। सः तस्य प्रकोष्ठं गत्वा स्वीयं पुस्तकं दृष्टवान्। तत्र तेन कृतानि चिह्नानि अदृश्यानि आसन्।

एवं तेन ज्ञातं यत् परमेश्वरस्य वचसि शङ्कां कृत्वा तेन महत् दुष्कृतम् आचरितम्। सः बहिः आगत्य उक्तवान् – "अयि प्रिये ! त्वं सौभाग्यवती। श्रीकृष्णः बलरामश्च स्वयम् अत्र आगतवन्तौ। सत्यम् ईश्वरः भक्तानां योग–क्षेमं वोढुम् आयाति। यदाऽहं गीतायां चिह्नं करोमि स्म तदा परमेश्वरस्य शीलेऽपि चिह्नं भवति स्म। यदा सः वदति योगक्षेमं वहामि, सः सत्यं तत् पालयति।"

कथायाः बोधः तदेव यदस्माभिः परमेशस्य वचसि मिथ्या शङ्का न कर्तव्या। श्रीमता आदिशङ्कराचार्येण गीतामहात्म्ये उक्तम् –

**गीता सुगीता कर्तव्या किमन्यैः शास्त्रविस्तरैः।**
**या स्वयं पद्मनाभस्य मुखपद्माद् विनिःसृता ॥**

## चतुरः पण्डितः (बालकथा)

मयूरः जानी

एकं नगरम् अस्ति। नगरस्य नाम जयपुरम् अस्ति। तत्र एकः पण्डितः निवसति। तस्य नाम चतुरः। यथा तस्य नाम अस्ति तथा तस्य कार्यम्। एकवारं नगरं प्रति एकः ऐन्द्रजालिकः आगच्छति। सः ऐन्द्रजालिकः पुरातन–सुवर्ण–पात्राणां नविनीकरणं करोति तथा धनं स्वीकरोति। सः चतुरः पण्डितः एतत् दृश्यं दृष्ट्वा चिन्तयति एतत् कथं शक्यम् ? एकवारं सः रात्रीकाले ऐन्द्रजालिकस्य गृहं गच्छति। तत्र सः पश्यति सः ऐन्द्रजालिकः सुवर्णवर्णस्य प्रयोगं करोति स्म। तथा पात्रे लिम्पति स्म।

द्वितीये दिने यदा ऐन्द्रजालिकः धनं स्वीकरोति तदा सः चतुरः पण्डितः पात्रं प्रक्षालयति। सर्वेपि पश्यन्ति। पात्रतः सुवर्णवर्णः अधः पतति। सः ऐन्द्रजालिकः बहु लज्जितः भवति। ततः पलायनं च करोति। जनाः चतुरपण्डितस्य जयनादं कुर्वन्ति। आनन्दम् अनुभवन्ति।

## विश्वशान्तेरुपायः

डॉ. सुखेश्वरः झा

(क्रमशः... )

महाभारतकारस्य इयम् आर्यदृष्टिः यत् पृथिव्यां यावन्ति धनधान्यानि कामिनी-काञ्चनादीनि वस्तूनि, सर्वाण्यपि तानि कस्यचित् एकस्यापि जनस्य सन्तोषाय अलं न भवन्ति। हविषा कृष्णवर्त्मा (-अग्निः) इव भोग्येन भोगाभिलाषः वर्धतेतराम् इति तु अन्यत्। किन्तु जीवन-निर्वाहाय किमपि भोज्यपेयोपयोज्यं यदस्ति न्यूनतोऽपि अनिवार्यं तस्य लाभः प्रत्येकं जनस्य कृते अपरिहार्यः। लाभे शान्तिः, अलाभे दुर्वारा अशान्तिः। लाभश्च वस्तुनः परिमाण-प्राचुर्यम् अपेक्षते। तच्च उत्पादनवृद्ध्या एव स्यात्।

घातक-शस्त्रास्त्रमूलायाः अशान्तेः परिहारस्तु मानवीयताभावनायाः भ्रातृत्वभावनायाश्च प्रसाराद् एव सम्भवति। विकासक्रमात् मानवानां भूयसी सङ्ख्या एकवंशोत्पन्नानाम् आधुनिक-वंश्यानां ग्रामव्यापिनी इव विश्वव्यापिनी सञ्जाता। कालिकी दैशिकी च दूरते एव मध्ये व्यवधानम् आवरणं वा सृजतः। खाद्यपेय-वस्त्रावास-सम्प्रदाय-भेदाश्च स्थान-समय-सृष्टाः। मूलतो मानवो मानवाद् अभिन्न एव। अद्यापि सौविध्यानुरोधात् कस्यचिद् भ्राता, पुत्रः पौत्रो वा दूरदेशम् आवसति। तान् अपि वंश्यान् कालः तथैव भिन्नान् कर्ता यथा अन्यान् विश्वस्थान् चकार। अतः विज्ञानस्य मानव-कल्याणाय एव उपयोगः भवतु न सृजतु भ्राता भ्रातृ-विघाताय आयुधम् इत्येषा भावना प्रचार्यमाणा अवधीयमाना च विश्वशान्तये प्रभवति।

परस्पर कलहेर्ष्या-द्वेष-लोभ-मोहादि दुर्भावनामूला या अशान्तिः तां शमयितुम् उक्तभ्रातृत्वभावनया सहैव मनुष्याणाम् अद्यात्म-विद्या-योगेन विवेकोदयः एव समर्थ उपायः भवेत् किल। ईर्ष्यादि दुर्गुणस्थाने कृपा-करुणा-परोपकारादि सद्भावानाम् उदयः असारस्य संसारस्य सम्यग्-ज्ञानादेव सम्भवति। तज्ज्ञानञ्च अध्यात्मविद्यया भविता। अध्यात्मविद्ययैव सकलानर्थकारिणी भौतिक-भोगमूलाजनानां प्रवृत्तिः क्षीणा स्यात्। तथैव-'ईशावास्यमिदं सर्वं यत् किञ्च जगत्यां जगत्। तेन त्यक्तेन भुञ्जीथा मा गृधः कस्यस्विद्धनम्' (ईशावास्योपनिषद्-१) इति सकलानर्थप्रशमकारिणी त्यागमूला प्रवृत्तिः उदियात्। तस्मात् संसारे शान्तेः उपायतया अध्यात्मविद्यायाः उपयोगः नूनं फलवान् भवितुं शक्नोति इति मे विश्वासः।

संक्षेपतः संसारे अशान्तिः जनसङ्ख्यावृद्धिमूला, घातका-युधमूला, मानव-दुर्भावनामूला च वर्तते। जन्म-क्रम-नियन्त्रणात् जीवननिर्वाहाय अनिवार्यवस्तूनां प्रचुरमात्रायाम् उत्पादनात्, विश्वमानवेषु एक-परिवारीयता-भावनायाः प्रचारात् भौतिकभोगभावनां निराकृत्य अध्यात्मविद्याबलेन त्यागमूलायाः भावनायाः जनेषु प्राबल्यं यथा स्यात् तथा उपदेशात् सा अशान्तिः दूरीकर्तुं शक्या। 'वसुधैव कुटुम्बकम्' इति भावनया सह ''सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः। सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःखभाग् भवेत्'' इति सर्व-कल्याण-भावना एव विश्वशान्तये प्रभवेत् इति दृढं प्रतीमः।

## Programme Schedule - 2021-22

| Sr No | Month | Programme | Duration & Starting Date | Time | Day | Fees(₹) |
|---|---|---|---|---|---|---|
| 1 | Jan | संस्कृत-सम्भाषण-वर्गः ( प्रथमः स्तरः ) | 06/01/21 to 05/04/21 | 06:30pm to 08:00pm | Monday-Wednesday Friday | 5000/- |
| 2 | Jan | संस्कृत-सम्भाषण-वर्गः ( प्रथमः स्तरः ) | 18/01/21 to 16/04/21 | 07:30am to 09:00am | Monday-Wednesday Friday | 5000/- |
| 3 | Jan | स्तोत्रपाठः ( निश्चितस्तोत्राणि ) | 21/01/21 to 11/03/21 | 06:30pm to 08:00pm | Tuesday-Thursday | 2000/- |
| 4 | Feb | छन्दःपरिचयः | 03/02/21 to 26/02/21 | 08:00am to 09:30am | Wednesday-Friday | 2000/- |
| 5 | April | संस्कृत-सम्भाषण-वर्गः ( प्रथमः स्तरः ) | 12/04/21 to 14/07/21 | 06:30pm to 08:00pm | Monday-Wednesday Friday | 5000/- |
| 6 | April | संस्कृत-सम्भाषण-वर्गः ( द्वितीयः स्तरः ) | 19/04/21 to 27/07/21 | 07:30am to 9:00am | Monday-Wednesday Friday | 5000/- |
| 7 | May | ग्रीष्मवर्गः<br>बालसंस्कारकेन्द्रम् ( Cl.1 to 8 )<br>बालसंस्कृतशिबिरम् ( Cl. 9 ) (with feedback)<br>मार्गदर्शनम् ( व्याकरणम् ) ( Cl.10 ) (with feedback) | 03/05/21 to 13/05/21 | 10:00am to 11:30am<br>10:00am to 11:30am<br>08:00am to 09:30am | Daily<br>Daily<br>Daily | 2000/-<br>3500/-<br>3500/- |
| 8 | June | Value Education Through Sanskrit बालसंस्कारकेन्द्रम् (Class SKg to 8) | 12/06/21 to 26/03/22 | 06:00pm to 07:30pm | Saturday | 5000/- |
| 9 | June | Value Education Through Sanskrit बालसंस्कारकेन्द्रम् (Class SKg to 8) | 13/06/21 to 27/03/22 | 11:00am to 12:30pm | Sunday | 5000/- |
| 10 | July | स्तोत्रपाठः ( शिवपूजनम्, शिवमहिम्नः स्तोत्रं च ) | 01/07/21 to 29/07/21 | 06:30pm to 08:00pm | Tuesday -Thursday | 1500/- |
| 11 | July | संस्कृत-सम्भाषण-वर्गः ( प्रथमः स्तरः ) | 19/07/21 to 20/10/21 | 06:30pm to 08:00pm | Monday-Wednesday Friday | 5000/- |
| 12 | Aug | संस्कृत-सम्भाषण-वर्गः ( प्रथमः स्तरः ) | 02/08/21 to 29/10/21 | 07:30am to 09:00am | Monday-Wednesday Friday | 5000/- |
| 13 | Aug | स्तोत्रपाठः ( मातृपूजनम्, शक्रादयस्तुतिः च ) | 03/08/21 to 31/08/21 | 06:30pm to 08:00pm | Tuesday- Thursday | 1500/- |
| 14 | Sept | Diploma in Sanskrit Teaching | 02/09/21 to 26/05/22 | 06:00pm to 08:00pm | Tuesday- Thursday | 7000/- |
| 15 | Oct | संस्कृत-सम्भाषण-वर्गः ( द्वितीयः स्तरः ) | 25/10/21 to 28/01/22 | 06:30pm to 08:00pm | Monday-Wednesday Friday | 5000/- |
| 16 | Nov | दीपावलीवर्गः<br>बालसंस्कारकेन्द्रम् ( Cl.1 to 8 )<br>बालसंस्कृतशिबिरम् ( Cl. 9 )<br>मार्गदर्शनम् ( व्याकरणम् ) ( Cl.10 ) | 09/11/21 to 19/11/21 | 10:00am to 11:30am<br>10:00am to 11:30am<br>08:00am to 09:30am | Daily<br>Daily<br>Daily | 2000/-<br>2000/-<br>2000/- |

- **For more information contact : Dr. Mihir Upadhyay Mobile: 98246 16237**

Core House, Off CG Road Ahmedabad 380 006 • www.eklavyasanskritacademy.org • E-mail: mihiresa@gmail.com

## कृपया हसन्तु

कश्चन ग्रामश्रेष्ठी मया नर्के अमिलत् । सः नर्कं कथं प्राप्तवान् ? इति मम आश्चर्यम् आसीत् । सः कदापि कस्यापि अयोग्यं नाकरोत् नाचिन्तयत् च । तेन सर्वदा सत्कार्याणि एव कृतानि आसन् । सः स्वस्य सत्कार्यैः, सद्विचारैः चतसृषु दिक्षु विख्यातः आसीत् । तथापि सः किमर्थं नर्कं प्राप्तवान् ? इति ज्ञातुम् अहं श्रेष्ठिणं पृष्टवान्- "भोः ! भवतः स्थानं तु स्वर्गे आसीत् । भवान् अत्र नर्के किं करोति ?"

तदा श्रेष्ठी अवदत् - "एतत् मम पत्न्याः कारणेन अभवत् ।" "पत्न्याः कारणेन ? तत् कथम्" इति अहम् अपृच्छम् । तदा श्रेष्ठी स्पष्टतां कुर्वन् अवदत् - "अहं मम जीवने कदापि असत्यं न अवदम् केवलं पत्न्याः पुरतः मया एकस्मिन् विषये सर्वदा असत्यं वक्तव्यम् आपतितम् ।" "कस्मिन् विषये ?" इति अहम् अपृच्छम् ।

"मम पत्नी प्रतिदिनं मह्यं भोजनं दत्त्वा पृच्छति स्म भोजनं कथम् अस्ति ?" इति श्रेष्ठी अवदत् ।

★ ★ ★ ★ ★

शिक्षकः - (नमनं प्रति) चन्द्रोपरि केन प्रथमः पादः स्थापितः आसीत् ?

नमनः - नील-आर्मस्ट्रोङ्गेन ।

शिक्षकः - द्वितीयपादः ?

नमनः - द्वितीयपादः अपि तेन एव स्थापितः स्यात् । सः 'लङ्गडीक्रीडां' क्रीडितुं तत्र न गतवान् आसीत् ।

## प्रहेलिका

– संस्कृतविकिपिडीयाजालस्थानात्

**वने वसति को वीरो योऽस्थिमांस विवर्जितः ।**
**असिवत् कुरुते कार्यं कार्यं कृत्वा वनं गतः ॥**

कश्चन वीरः यः अस्थिरहितः, मांसरहितः च वर्तते । सः असिवत् कार्यं कृत्वा वनम् अगच्छत् । सः कः ?

**उत्तरम्** – नारिकेलः

**वासः तस्य तु आकाशे पादाः तस्य च भूतले ।**
**स्वपादैः पीयते तोयं तमस्तेन तु खाद्यते ॥**

कश्चन तादृशः यः आकाशे वसति । तस्य पादाः भूमौ वर्तन्ते । सः स्वपादैः जलं पिबति अन्धकारः तस्य भोजनं वर्तते । सः कः ?

**उत्तरम्** – सूर्यः

**विराजराजपुत्रारेः यन्नाम चतुरक्षरम् ।**
**पूर्वार्धं तव वैरीणां परार्धं तव सङ्गरे ॥**

विः –पक्षी, विराजः – पक्षिणां राजा गरुडः, विराजराजः – गरुडस्य स्वामी विष्णुः, विराजपुत्रः – विष्णोः पुत्रः मन्मथः, विराजराजपुत्रारिः – मन्मथस्य शत्रुः ईश्वरः । तस्य चतुर्वर्णयुक्तं नाम – मृत्युञ्जयः । तस्य प्रथमार्धम् – मृत्युः – भवतः शत्रूणां परार्धः – जयः भवतः भवतु ।

उत्तरम् – मृत्युञ्जयः

## ज्ञानसरिता

श्यामः पटेलः

**''वेनिला''-आस्वादः** – अस्माकम् आधुनिकजगति वयं विश्वस्य विभिन्नदेशानां विधविधभोज्यपदार्थानि प्राप्तुं समर्थाः सर्वदा खादितुम् उद्युक्ताश्च स्मः । शीतपेयपदार्थानि पयोहिमञ्च खादन्तः वयं 'वेनिला' इति शब्देन परिचिताः । अयं 'वेनिला' स्वादः सर्वाधिकः रोचते । तस्य खाद्येषु उपयोगोऽपि अधिकः । 'वेनिला' केसरात् परं द्वितीयं महार्घं वनस्पतिजं वस्तु वर्तते ।

'वेनिला' वृक्षतः प्राप्यते । तादृशाः वृक्षाः मेक्सिकोदेशे भवन्ति । तेषां फलस्य बीजात् 'वेनिला' लभ्यते । 'वेनिला' इत्यस्य वृक्षाः ३० फीटपरिमितं यावत् औन्नत्यं प्राप्नुवन्ति । एतेषां वृक्षाणां प्रायः १५० प्रजातयः सन्ति । एतस्य वृक्षस्य पुष्पेषु केवलं 'मेलियोना' नामधेया मधुमक्षिका उपविशति । एषा मधुमक्षिका अपि अमेरीकादेशे एव दृश्यते । यत्र 'मेलियोना' मधुमक्षिका नास्ति तेषु देशेषु तत्रत्याः कृषकाः तेषां पुष्पाणां परागस्य सूच्या परस्परं विनिमयं कृत्वा पुष्पस्य विकासं कल्पयन्ति कारयन्ति च ।

अमेरीकामहाद्वीपे युरोपमहाद्वीपे च अयं स्वादः अत्यधिकः प्रियः । 'वेनिला' इत्यस्य वृक्षाः आर्द्रवायुमण्डलयुक्ते स्थाने एव विकसन्ति । विपणिषु लभमानः 'वेनिला' स्वादः अप्राकृतिकः भवितुम् अर्हति । तादृशः कृत्रिमस्वादः 'वेनेलीन' नामाख्यात् पदार्थात् भवति । सः 'इमिटेशनवेनिला' इत्यपि कथ्यते ।

**आर्द्र** – humid, **महार्घ** – costly, **तत्रत्य** – of that place, **विपणिः** – market

## शब्दमञ्जूषा

| | |
|---|---|
| **बहिरन्धकारः** | black out |
| **पङ्कम्** | block |
| **पट्टिका** | board |
| **छात्रावासः** | boarding house |
| **आग्नेयास्त्रम्** | bomb |
| **ऋणपत्रम्** | bond |
| **अस्थि** | bone |
| **लाभांशः** | bonus |
| **यात्राचिटिकाकार्यालयः** | booking office |
| **लेखायोजना** | budget |
| **चित्रग्रहणयन्त्रम्** | camera |
| **प्रमाणपत्रम्** | certificate |
| **अध्यक्षः** | chairman |
| **कक्षः** | chamber |
| **कुलाधिपतिः** | chancellor |

## किं भवन्तः जानन्ति ?

**१) मृच्छकटिकग्रन्थस्य रचयिता कः वर्तते ?**

(क) तुलसी (ख) कल्हणः (ग) शूद्रकः (घ) बाणभट्टः

**२) अमरकोषः केन रचितः अस्ति ?**

(क) मनुना (ख) जायस्या (ग) अमरसिंहेन (घ) भारविना

**३) उत्तररामचरितस्य रचयिता कः अस्ति ?**

(क) भवभूतिः (ख) तुलसीदासः (ग) जायसी (घ) वाल्मीकिः

**४) एतेषु अर्थशास्त्रस्य कर्ता कः वर्तते ?**

(क) भारविः (ख) पतञ्जलिः (ग) कौटिल्यः (घ) वात्स्यायनः

**५) कामसूत्रग्रन्थस्य कर्ता कः वर्तते ?**

(क) कल्हणः (ख) वात्स्यायनः (ग) चन्दवरदाई (घ) बाणः

**६) राजतरङ्गिण्याः रचना केन कृतास्ति ?**

(क) जयदेवेन (ख) जायस्या (ग) कल्हणेन (घ) विष्णुशर्मणा

**७) कादम्बरीग्रन्थस्य कर्ता कः वर्तते ?**

(क) अश्वघोषः (ख) बाणभट्टः (ग) कालिदासः (घ) जगनिकः

उत्तराणि – (१) ग (२) ग (३) क (४) ग (५) ख (६) ग (७) ख

## मासवार्ता

### सम्पन्नः दुर्गासप्तशत्याः अभ्यासक्रमः




स्तोत्रपाठं पठितुम् इच्छुकानां छात्राणां कृते एकलव्य-संस्कृत-एकेडेमी-संस्थानेन संस्कृतस्तोत्रपाठस्य विविधाः पाठ्यक्रमाः सञ्चाल्यन्ते । एतस्मिन् एव उपक्रमे 'श्रीदुर्गासप्तशती (चण्डीपाठः)' इति अभ्यासक्रमः जुलाईमासस्य द्वितीयदिनाङ्कात् आरभ्य डिसेम्बरमासस्य २७ दिनाङ्कं यावत् प्राचलत् । अभ्यासक्रमेऽस्मिन् १५ छात्राः अध्ययनम् अकुर्वन् । अध्ययनं कृत्वा छात्राः सन्तुष्टाः आसन् । श्रीऋषिपुरोहितः अभ्यासक्रमेऽस्मिन् छात्रान् अपाठयत् तेषां मार्गदर्शनं चाकरोत् ।

संस्कृत-
**साम्प्रतम्**

नमस्कारः
यदि भवन्तः "साम्प्रतम्" मासिकीपत्रिकायाः ग्राहकाः भवितुम् इच्छन्ति तर्हि अधोलिखिते सङ्केते धनं प्रेषयन्तु ।

**ग्राहक शुल्कम्**

| | |
|---|---|
| वार्षिकं रू | - 100 |
| द्वैवार्षिकं रू | - 175 |
| त्रैवार्षिकं रू | - 250 |
| अङ्कमूल्यं रू | - 10 |

### आरब्धः संस्कृतभाषाशिक्षणवर्गः

प्रारम्भतः संस्कृतभाषायाः अध्ययनं कर्तुम् इच्छुकानां छात्राणां कृते एकलव्य-संस्कृत-एकेडेमी-संस्थानेन प्राथमिकः संस्कृतभाषाशिक्षणस्य वर्गः डिसेम्बरमासस्य १ दिनाङ्के आरब्धः वर्तते । वर्गेऽस्मिन् विविधेभ्यः देशेभ्यः तद्यथा अमेरीका, केनेडा, भारत इत्यादिभ्यः २० छात्राः संस्कृताध्ययनस्य आरम्भम् अकुर्वन् । अभ्यासक्रमोऽयम् एकमासपर्यन्तं प्रचलिष्यति ।

**प्रियवाचकाः**
- **भवतां समीपे यदि पत्रिकायां प्रकाशनयोग्याः लेखाः, कथाः, हास्यकणिकाः वा सन्ति तर्हि कृपया प्रेषयन्तु ।**
- **पत्रिकायाः विषये सूचनम् अपि स्वीकार्यम् अस्ति ।**

EKLAVYA SANSKRIT ACADEMY
||जयतु संस्कृतं जयतु भारतम्||

**Published, Printed and Edited by Dr. Mihir Upadhyay**
For. Eklavya Sanskrit Academy
Core House, Off CG Road
Ahmedabad 380 006 India
**Fax:** (91) 79 26563681
**Mobile:** (91) 98246 16237
**e-mail:** mihiresa@gmail.com
**web:** www.eklavyasanskritacademy.org

Printed at :- Print Vision Private Limited, Print Vision House, Jay Gujarat Fruit Lane, Ambawadi Market, Ahmedabad, Gujarat 380006